# Tripurasundari Pancharatnastotram

# ત્રિપુરસુન્દરી પઞ્ચરત્નસ્તોત્રમ્

## Document Information

Text title : Tripurasundari Pancharatnastotram

File name : tripurasundarIpancharatnastotram.itx

Category : devii, dashamahAvidyA, devI, pancharatna

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 18, 2020

*sanskritdocuments.org*

# ત્રિપુરસુન્દરી પઞ્ચરત્નસ્તોત્રમ્

નીલાલકાં શશિમુખીં નવપલ્લવોષ્ઠીં
    ચામ્પેયપુષ્પસુષમોજ્જ્વલદિવ્યનાસામ્ ।
પદ્મેક્ષણાં મુકુરસુન્દરગણ્ડભાગાં
    ત્વાં સામ્પ્રતં ત્રિપુરસુન્દરિ! દેવિ! વન્દે ॥ ૧॥

શ્રીકુન્દકુડ્મલશિલોજ્જ્વલદન્તવૃન્દાં
    મન્દસ્મિતદ્યુતિતિરાહિતચારુવાણીમ્ ।
નાનામણિસ્થગિતહારસુચારુકણ્ઠીં
    ત્વાં સામ્પ્રતં ત્રિપુરસુન્દરિ! દેવિ! વન્દે ॥ ૨॥

પીનસ્તનીં ઘનભુજાં વિપુલાબ્જહસ્તાં
    ભૃઙ્ગાવલીજિતસુશોભિતરોમરાજિમ્ ।
મત્તેભકુમ્ભકુચભારસુનમ્રમદ્ધ્યાં
    ત્વાં સામ્પ્રતં ત્રિપુરસુન્દરિ! દેવિ! વન્દે ॥ ૩॥

રમ્ભોજ્જ્વલોરુયુગલાં મૃગરાજપત્રા-
    મિન્દ્રાદિદેવમકુટોજ્જ્વલપાદપદ્મામ્ ।
હેમામ્બરાં કરધૃતાઞ્ચિતખડ્ગવલ્લીં
    ત્વાં સામ્પ્રતં ત્રિપુરસુન્દરિ! દેવિ! વન્દે ॥ ૪॥

મત્તેભવક્ત્રજનનીં મૃડદેહયુક્તાં
    શૈલાગ્રમદ્ધ્યનિલયાં વરસુન્દરાઙ્ગીમ્ ।
કોટીશ્વરાખ્યહૃદિસંસ્થિતપાદપદ્માં
    ત્વાં સામ્પ્રતં ત્રિપુરસુન્દરિ! દેવિ! વન્દે ॥ ૫॥

બાલે! ત્વત્પાદયુગલં ધ્યાત્વા સંપ્રતિ નિર્મિતમ્ ।
નવીનં પઞ્ચરત્નં ચ ધાર્યતાં ચરણદ્વયે ॥ ૬॥

ઇતિ શ્રીત્રિપુરસુન્દરીપઞ્ચરત્નસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Tripurasundari Pancharatnastotram*

pdf was typeset on January 18, 2020

Please send corrections to *sanskrit@cheerful.com*